# MP BOARD CLASS 10 SANSKRIT GENERAL MODEL PAPER SET 6 2020

## म.प्र. बोर्ड कक्षा 10 संस्कृत (सामान्य) मोडल पेपर सेट 6 2020

समय-3 घण्टे पूर्णांक-100

निर्देशः- (i) सर्वे प्रश्नाः अनिवार्यः सन्ति । 1x5=5

(ii) प्रश्नानां सम्मुखे निर्धारिताः अङ्काः प्रदत्ताः।

प्रश्न 1. उचित विकल्पं चित्वा लिखत-

(क) व्यंजन संधि अस्ति-

(अ) दिगम्बरः (ब) कपीशः (स) सोऽपि (द) इतोधर्मः।

(ख) मनः + रथः इत्यस्य सन्धिः अस्ति-

(अ) विसर्ग सन्धिः (ब) व्यंजन सन्धिः (स) गुण स्वर सन्धिः (द) पूर्वरूप स्वर सन्धिः।

(ग) 'दिगम्बरः' इतस्य संधि विच्छेदः अस्ति-

(अ) दिग् + अम्बरः (ब) दिक + अम्बरः (स) दिशा + अम्बरः (द) दिक् + अम्बरः।

(घ) यण् सन्धेः उदाहरणम्अस्ति-

(अ) हिमालयः (ब) इत्यादि (स) गणेशः (द) नयन।

(ङ) अधोलिखितेषु अव्ययं नास्ति-

(अ) अत्र (ब) तत्र (स) कुत्र (द) पुत्रः।

उत्तर- (क) (अ), (ख) (अ), (ग) (द), (घ) (ब), (ङ) (द)।

प्रश्न 2. उचित विकल्पं चित्वा लिखत-

(क) “पितरौ" इत्यस्य समास विग्रहः भवति-

(अ) माता पिता (ब) माता च पिता (स) माता पिता च (द) माता च पिता च।

(ख) बहुब्रीहि समासस्य उदाहरणम् अस्ति-

(अ) दीन दानम् (ब) सचक्रम (स) कृष्णसर्पः (द) पीताम्बरः।

(ग) तत्पुरुष समासस्य उदाहरणम् अस्ति-

(अ) प्रतिदिनम् (ब) दीनदानम् (स) नीलोत्पलम् (द) दशाननः।

(घ) “निर्धनः' इत्यस्मिन् पदे उपसर्गः अस्ति-

(अ) निस् (ब) निर् (स) नि (द) निध।

(ङ) प्राचार्यः इत्यस्मिन् पदे उपसर्गः अस्ति-

(अ) प्रा (ब) प्रीत (स) प्र (द) प्राच।

उत्तर- (क) (द), (ख) (द), (ग) (ब), (घ) (ब), (ङ) (स)।

प्रश्न 3. उचित विकल्पं चित्वा लिखत-

(क) 'नेष्यामः' इत्यस्मिन् पदे धातुः अस्ति-

(अ) नेष्य (ब) नेस् (स) नेष् (द) नी।

(ख) 'दक्ष्यति' अस्मिन् पदे धातु अस्ति-

(अ) दृश् (ब) द्रक्ष (स) दा (द) रक्ष्।

(ग) 'भवेयुः' इत्यस्मिन् पदे वचनम् अस्ति-

(अ) एकवचनम् (ब) द्विवचनम् (स) बहुवचनम् (द) त्रिवचनम्।

(घ) 'अहरन्' इत्यस्मिन् पदे पुरुषः अस्ति-

(अ) प्रथम पुरुषः (ब) मध्यम पुरुषः (स) उत्तम पुरुषः (द) महापुरुषः।

(ङ) 'सदाचार एव परमोधर्मः' अस्मिन् वाक्ये अव्ययम् अस्ति-

(अ) परम (ब) एव (स) सदाचारः (द) धर्मः।

उत्तर- (क) (द), (ख) (अ), (ग) (स), (घ)(अ), (ङ) (ब)।

प्रश्न 4. उचित विकल्पं चित्वा लिखत-

(क) 'अज + टाप्' इत्यस्य पदम् भविष्यति

(अ) अजटा (ब) अजा (स) अजटाप् (द) अटाप्।

(ख) 'गुणवान' प्रत्ययोऽस्ति-

(अ) मतुप् (ब) ल्यप् (स) ठक् (द) क्तवतु।

(ग) “परित्यज्य" इत्यस्मिन् पदे प्रत्यय अस्ति-

(अ) शत् (ब) ल्यप् (स) क्त्वा (द) शानच।

(घ) 'बालिका' इत्यस्मिन् पदे प्रत्ययः अस्ति

(अ) आप् (ब) जाप् (स) ज्ञाप् (द) टा।

(ङ) आपदि स्फुरति प्रज्ञा यस्य ............. स एवं हि-

(अ) वीरः (ब) नीरः (स) महावीरः (द) धीरः।

उत्तर- (क) (ब), (ख) (अ), (ग) (ब), (घ) (द), (ङ) (द)।

प्रश्न 5. प्रदत्तै शब्दैः रिक्तस्थानपर्ति कुरुत (कोऽपि पञ्च)-

(श्रेष्ठः, निरोग, यशः, दुःखानि, सत्ये, गंगा)।

(क) सर्व ............. प्रतिष्ठितम्।

(ख) मनुष्य सदा ............. भवेत् ।

(ग) भागीरथः ............ भूमौ आनीतवान् ।

(घ) ज्येष्ठः .............. कुल लोके।

(ङ) महर्षि............. शरीरेण अमरः अस्ति।

(च) दयानन्दः ............. सोवापि कर्तव्यविमुखः न जातः।

उत्तर- (क) सत्ये, (ख) निरोग, (ग) गंगा, (घ) श्रेष्ठः (ङ) यशः, (च) दुःखानि।

प्रश्न 6. अधोलिखितेषु प्रश्नेषु त्रयाणां प्रश्नानाम् उत्तराणि संस्कृतभाषायाम् एकवाक्येन लिखत-http://www.mpboardonline.com

(क) मे मनः किम् अस्तु ? -

(ख) वृक्षस्य आधारभूता का?

(ग) संस्कृतभाषा कस्य पोषणं करोति?

(घ) रघु कस्मात् हेमराशिं लब्धवान् ?

(ङ) छत्रसालः कस्य शिष्यः आसीत् ?

प्रश्न 7. अधोलिखितेषु द्वयोः शब्दयोः शब्दरूपाणि निर्देशानुसारं लिखत-

(क) 'पितृ' तृतीया विभक्तिः एकवचनं ।

(ख) 'राजन्' षष्ठी विभक्तिः द्विवचनं।

(ग) 'अस्मद्' सप्तमी विभक्ति बहुवचनं।

प्रश्न 8. 'मह्यम्' अथवा 'मम' इति पदस्य विभक्तिं वचनं च लिखत।

प्रश्न 9. अधोलिखितेषु गद्यांशेषु गद्यांशद्वयस्य प्रश्नानाम् उत्तराणि संस्कृतभाषायां लिखत-

(क) मध्यप्रदेशस्यनगरीयं पौराणिकी ऐतिहासिकी च वर्तते। विदिशा पूर्वस्मिन् काले 'भेलसा' इति नाम्ना सविख्याता आसीत। एतस्य कारणं सर्यदेवतायाः मन्दिरस्य 'भेल्लस्वामिनः' इति लोकख्यातिरेव। पुरा विदिशानगरी समुन्नतमेकं वाणिज्यिक केन्द्रमासीत्। योगदर्शनस्य प्रणेता व्याकरणमहाभाष्यस्य कर्ता महर्षिः पतञ्जलिः सम्राट अशोकोऽपि विदिशया सह सम्बद्धौ आस्ताम्। http://www.mpboardonline.com

प्रश्नाः-1. मध्यप्रदेशस्य का नगरी पौराणिकी ऐतिहासिकी च वर्तते?.

2. पूर्वस्मिन् काले विदिशा नगर्याः किं नाम आसीत् ?

3. पुरा विदिशा नगरी कीदृशं केन्द्रम् आसीत् ?

4. 'भेल्लस्वामिनः' इति कस्य मन्दिरस्य लोकख्यातिः?

5. पतञ्जलिः कः आसीत् ?

(ख) भगीरथः दुःखितः अभवत्। सः पुनः तपः कृतवान्। शिवः तस्य पुरतः प्रत्यक्षः अभवत्। "हे ईश! नदी भूमौ विसृजतु' इति भगीरथः प्रार्थितवान्। तां प्रार्थनाम् अङ्गीकृत्य शिवः नद्याः जलं भूमौ विसृष्टवान्। भगीरथः नदीं भूमितः पातालं नीतवान्। पाताले प्रवहन्ती गङ्गासगरपुत्राणां भस्मानि स्पृष्टवती। सगरपुत्राः स्वर्गलोकं गतवन्तः।

प्रश्नाः -1. भगीरथः नदी भूमितः कुत्र नीतवान् ?

2. भगीरथ: किं प्रार्थितवान् ?

3. भगीरथस्य पुरतः कः प्रत्यक्षः अभवत् ?

4. के स्वर्गलोकं गतवन्तः ?

5. कः पुनः तपः कृतवान् ?

(ग) गङ्गातीरे मार्कण्डेयः नाम कश्चन् मुनिः वसति स्म। तस्य गुरुकुले बहवः शिष्याः आसन्। वासुदेवः तस्य प्रियशिष्यः। तस्य द्वादशवर्षात्मकम् अध्ययनं यदा समाप्तं तदा गुरुः तम् आहूय अवदत्-"शिष्य! अधुना भवान् सर्वविद्यापारङ्गतः अस्ति। अतः इतः परं स्वग्रामं

गन्तुम् अर्हति भवान्। गमनात् पूर्वं भवता द्वारकापुरस्य देवराजस्य गृहं दृष्ट्वा आगन्तव्यम्।

प्रश्नाः -1. मार्कण्डेयः नाम ऋषिः कुत्र वसति स्म?

2. वासुदेवः कस्य प्रियशिष्यः आसीत् ?

3. बहवः शिष्याः कुत्र आसन् ?

4. सर्वविद्यापारङ्गतः कः अभवत्।

5. गुरुः शिष्यम् आहूय कदा अवदत् ?

प्रश्न 10. अधोलिखितेषु पद्यांशेषु पद्यांशद्वयस्य प्रश्नानाम् उत्तराणि संस्कृतभाषायां लिखत-

(क) गङ्गा पापं शशी तापं दैन्यं कल्पतरुस्तथा

पापं तापं च दैन्यंच नन्ति सन्तोमहाशयाः॥

प्रश्नाः-1. का पापं हन्ति ?

2. शशी किं करोति ?

3. कल्पतरुः किं हन्ति ?

4. पापं तापं दैन्यं च के नन्ति।

5. 'हन्ति' इत्यस्मिन् पदे किं वचनम् अस्ति ?

6. 'पापम्' इति पदस्य विलोम पदं लिखत।

(ख) ॐ येन कर्माण्यपसो मनीषिणो यज्ञे कृण्वन्ति विदथेषु धीराः।

यदपूर्वं यक्षमन्तः प्रजानां तन्मे मनः शिवसङ्कल्पमस्तु॥

प्रश्नाः-1.केन अपसः मनीषिणश्च यज्ञे विदथेषु च कर्माणि कुर्वन्ति ?

2. अपूर्वं यक्षमन्तः प्रजानां कः?

3. कस्य मनः शिवसङ्कल्पमस्तु ?

4. 'धीरः' इति पदस्य विलोमपदं लिखत।

5. 'अस्ति' इति शब्दे लकारः, पुरुषः, वचनम् लिखत।

(ग) युवान एष वः परीक्षणस्य काल आगतः।

हिमालयस्य रक्षणे समुद्यताः स्थ सर्वतः।।

अयं सखा पुरातनोऽस्य भारतस्य विद्यते।

स्वकर्मणि प्रवर्तितुं कदापि नैव खिद्यते॥

प्रश्नाः -1. युवान एष वः कस्य कालः आगतः?

2. कस्य रक्षणे समुद्यताः स्थ सर्वतः?

3. अयं पुरातनो.अस्य भारतस्य कः विद्यते ?

4. कस्मिन् प्रवर्तितुं कदापि नैव खिद्यते ?

5. 'कदापि' इत्यस्य पदस्य सन्धिविच्छेदं कुरुत।

प्रश्न 11. युग्ममेलनं कुरुत (कोऽपि चत्वारः)

| (अ) | (ब) |
|---|---|
| 1. वरुणदेवः | (क) वृद्धः |
| 2. द्विजश्रेष्ठः | (ख) खगोलशास्त्रं |
| 3. दीर्घसूत्री | (ग) प्रसिद्धाः |
| 4. कालगणना | (घ) न स्यात् |
| 5. महापुरुषाः | (ङ) वृष्टिं वर्षति। |

उत्तर-1. (ङ), 2. (क), 3. (घ), 4. (ख), 5. (ग)। http://www.mpboardonline.com

प्रश्न 12. शुद्धवाक्यानांसमक्षम्"आम्"अशुद्धवाक्यानांसमक्षं"न"इति लिखत (कोऽपि चत्वारः)-

1. कौत्सः गुरुदक्षिणार्थी आसीत् ।

2. छिन्नः चंदनतरुः गंधं जहाति।

3. एकः शून्य गृहम् अनुप्रविशेत्।

4. घटोत्कचः जनन्या आज्ञप्तः।

5. महर्षेः ख्यातिः सर्वत्र व्याप्ता अस्ति।

उत्तर-1. आम्, 2. आम्, 3. न, 4. आम्, 5. आम्।

प्रश्न 13. अधोलिखितेषु प्रश्नेषु चतुर्णां प्रश्नानाम् उत्तराणि संस्कृतभाषायाम् एकपदेन लिखत-

1. कदा दधि न भुञ्जीत् ?

2. का रूपं नाशयिष्यति ?

3. घनोपगूढं किम् ?

4. महाभारतस्य प्रणयनं केन कृतम् ?

5. भारतीयैकतायाः साधकं किम् ?

प्रश्न 14. प्रश्नपत्रे समागतान् श्लोकान् विहाय स्वपाठ्यपुस्तकस्य सुभाषितद्वयं लिखत।

प्रश्न 15. स्वप्राचार्यस्य कृते छात्रवृत्यर्थम् एकं प्रार्थनापत्रं संस्कृतभाषायां लिखत।

अथवा

स्वमित्राय एकं शुभकामनापत्रं संस्कृतभाषायां लिखत।

प्रश्न 16. अधोलिखितेषु "पञ्च" अशुद्धकारकवाक्यानां शुद्धिः करणीया-

1. श्रीगणेशं नमः।

2. छात्राः क्रीडाक्षेत्रे क्रीडति ।

3. पिता पुत्रस्य सह गच्छति।

4. कृष्णं नवनीतं रोचते।

5. भवान् किं करोषि।

6. कृषकाः ग्रामे गच्छन्ति।

प्रश्न 17. अधोलिखितवाक्यानां कथानुसारेण क्रमसंयोजनं कुरुत-

1. प्रसिद्धः स्वामिप्राणनाथः अस्य गुरुः आसीत्।

2. तस्मै शिवराजवीरोऽपि सर्वविधं सहाय्यं कर्तुं वचनम् अयच्छत् ।

3. यथासमये एतदर्थ एव छत्रसालः शिववीर महाराजम् अपि मिलितवान्।

4. तथा च स्वतन्त्रतायै योद्धं स्वाशीर्वादस्वरूपं भवानीति' नामक कृपाणम् अपि दत्तवान्। ।

5. 'बुन्देल केशरी' इति विख्यातस्य छत्रसालस्य जन्म 1649 तमे ईस्वीये अभवत्।

6. अयं वीरः बाल्यकालादेव भारतमातरं मुगलशासनात् विमोक्तुम् प्रयतते स्म।

प्रश्न 18. अधोलिखितम् अपठितं गद्यांशं सम्यक् पठित्वा प्रश्नानाम् उत्तराणि संस्कृतभाषायाम् लिखत-

संस्कृतभाषा अस्माकं देशस्य प्राचीनता भाषा अस्ति। प्राचीनकाले सर्वे एव भारतीयाः संस्कृतभाषया एव व्यवहारं कुर्वन्ति स्म। कालान्तरे विविधाः प्रान्तीयाः भाषाः प्रचलिताः अभवन् किन्तु संस्कृतस्य महत्वं अद्यापि अक्षुण्णं वर्तते। सर्वे प्राचीनग्रन्थाः चत्वारो वेदाश्च संस्कृत भाषायामेव सन्ति । संस्कृतभाषा भारतराष्ट्रस्य एकतायाः आधारः अस्तिः।

प्रश्नाः 1. उपर्युक्त गद्यांशस्य उचितं शीर्षकं लिखत। http://www.mpboardonline.com

2. अस्माकं देशस्य प्राचीनतमा भाषा का?

3. सर्वे वेदग्रन्थाः कस्यां भाषायां सन्ति ?

4. भारत राष्ट्रस्य एकतायाः आधारः कः?

5. कस्य महत्वम् अद्यापि अक्षुण्णं वर्तते ?

प्रश्न 19. अधोलिखितेषु एकं विषयं स्वीकृत्य शतशब्देषु संस्कृतभाषायाम् निबन्धं लिखत-

1. छात्रजीवनम्

2. महाकविः कालिदासः

3. उत्सवः (दीपावलिः)

4. सदाचारः।